# 4. कल्पतरूः

## अभ्यासः

**प्रश्न 1. एकपदेन उत्तरं लिखत –**

(क) जीमूतवाहनः कस्य पुत्रः अस्ति?
(ख) संसारेऽस्मिन् कः अनश्वरः भवति?
(ग) जीमूतवाहनः परोपकारैकफलसिद्धये कम् आराधयति?
(घ) जीमूतवाहनस्य सर्वभूतानुकम्पया सर्वत्र किं प्रथितम्?
(ङ) कल्पतरुः भुवि कानि अवर्षं?

**उत्तर:**
(क) जीमूतवाहनस्य
(ख) परोपकारः
(ग) कल्पपादपम्
(घ) यशः
(ङ) वसूनि

**प्रश्न 2. अधोलिखितानां प्रश्नानाम् उत्तरः संस्कृतभाषया लिखित –**

(क) कञ्चनपुरं नाम नगरं कुत्र विभाति स्म?
(ख) जीमूतवाहनः कीदृशः आसीत्?
(ग) कल्पतरोः वैशिष्ट्यमाकर्ण्य जीमूतवाहनः किम् अचिन्तयत्?
(घ) हितैषिणः मन्त्रिणः जीमूतवाहनं किम् उक्तवन्तः?
(ङ) जीमूतवाहनः कल्पतरुम् उपगम्य किम् उवाच?

**उत्तर:**
(क) कञ्चनपुर नाम नगर हिमवतः सानोपरि विभाति स्म।
(ख) जीमूतवाहनः महान् दानवीरः सर्वभूतानुकम्पी च आसीत्।
(ग) कल्पतरोः वैशिष्ट्यमाकण्र्य जीमूतवाहनः अचिन्तयत् यत् "अहो! ईदृशम् अमरपादपं प्राप्यापि पूर्वैः पुरुषैअस्माकं तादृशं फलं किमपि न प्राप्तम्। किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदपि अर्थः अर्थितः। तदहमस्मात् कल्पतरोः
अभीष्टं साधयामि" इति।
(घ) हितैषिणः मन्त्रिणः जीमूतवाहनं उक्तवन्तः-"युवराज! योऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठति स तव सदा पुज्यः। अस्मिन् अनुकूले स्थिते सति शक्रोऽपि अस्मान् बाधितुं न शक्नुयात्।"

www.dreamtopper.in

(ङ) जीमूतवाहन: कल्पतरुम् उपगम्य उवाच-"देव! त्वया अस्मत्पूर्वेषाम् अभीष्टाः कामाः पूरिताः तन्ममैक कामं पूरय। यथापृथिवीम् अदरिद्राम् पश्यामि तथा करोतु देव" इति।

**प्रश्न 3. अधोलिखितवाक्येषु स्थूलपदानि कस्मै प्रयुक्तानि?**

(क) तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम्।
(ख) राजा सम्प्राप्तयौवनं तं यौवराज्ये अभिषिक्तवान्?
(ग) अयं तव सदा पूज्यः।
(घ) तात! त्वं तु जानासि यत् धनं वीचिवच्चञ्चलम्।

**उत्तर:**
(क) हिमवते (हिमालयाय)
(ख) राजपुत्राय (जीमूतवाहनाय)
(ग) कल्पतरवे
(घ) पित्रे (जीमूतकेतवे राज्ञे)

**प्रश्न 4. अधोलिखितानां पदानां पर्यायपदं पाठात् चित्वा लिखत –**

(क) पर्वतः – .................
(ख) भूपतिः – .................
(ग) इन्द्रः – .................
(घ) धनम् – .................
(ङ) इच्छितम् – .................
(च) समीपम् – .................
(छ) धरित्रीम् – .................
(ज) कल्याणम् – .................
(झ) वाणी – .................
(ज) वृक्षः – .................

**उत्तर:**
(क) पर्वतः – नगेन्द्रः
(ख) भूपतिः – राजा
(ग) इन्द्रः – शक्रः
(घ) धनम् – अर्थः
(ङ) इच्छितम् – अभीष्टम्/अर्थितः
(च) समीपम् – अन्तिकम्

www.dreamtopper.in

(छ) धरित्रीम् – पृथ्वीम्
(ज) कल्याणम् – स्वस्ति/सुखम्
(झ) वाणी – वाक
(ञ) वृक्षः – तरुः

**प्रश्न 5. 'क' स्तम्भे विशेषणानि 'ख' स्तम्भे च विशेष्याणि दत्तानि। तानि समुचित योजयत –**

'क' स्तम्भ – 'ख' स्तम्भ
कुलक्रमागतः – परोपकारः
दानवीरः – मन्त्रिभिः
हितैषिभिः – जीमूतवाहनः
वीचिवच्चञ्चलम् – कल्पतरुः
अनश्वरः – धनम्

**उत्तर:**
'क' स्तम्भः – 'ख' स्तम्भः
कुलक्रमागत: – कल्पतरु:
दानवीर: – जीमूतवाहनः
हितैषिभिः – मन्त्रिभिः
वीचिवच्चञ्चलम् – धनम्
अनश्वरः – परोपकारः

www.dreamtopper.in

**प्रश्न 6. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत –**

(क) तरोः कृपया सः पुत्रम् अप्राप्नोत्।
(ख) सः कल्पतरवे न्यवेदयत्।
(ग) धनवृष्ट्या कोऽपि दरिद्रः नातिष्ठत्।
(घ) कल्पतरुः पृथिव्यां धनानि अवर्षत्।
(ङ) जीवानुकम्पया जीमूतवाहनस्य यशः प्रासरत्।

**उत्तर:**
(क) कस्य
(ख) कस्मै
(ग) कया
(घ) कस्याम्
(ङ) कया

**प्रश्न 7. (अ) "स्वस्ति तुभ्यम्" स्वस्ति शब्दस्य योगे चतुर्थी विभक्तिः भवति। इत्यनेन नियमेन अत्र चतुर्थी विभक्तिः**
प्रयुक्ता एवमेव (कोष्ठकगतेषु पदेषु) चतुर्थी विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –

(क) स्वस्ति ............... (राजा)
(ख) स्वस्ति ........ (प्रजा)
(ग) स्वस्ति .................. (छात्र)
(घ) स्वस्ति .......... (सर्वजन)

**उत्तर:**
(क) राज्ञे।
(ख) प्रजाभ्यः प्रजाये।
(ग) छात्राय/छात्रेभ्यः।
(घ) सर्वजनेभ्यः ।

**प्रश्न 7. (आ) कोष्ठकगतेषु पदेषु षष्ठी विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –**

(क) तस्य ......... उद्याने कल्पतरुः आसीत्। (गृह)
(ख) सः .................... अन्तिकम् अगच्छत्।
(ग) ................. सर्वत्र यशः प्रथितम्
(जीमूतवाहन)
(घ) अयं ................." तरुः?(किम्)

**उत्तर:**
(क) गृहस्य
(ख) पितुः
(ग) जीमूतवाहनस्य
(घ) कस्य

www.dreamtopper.in